विहितमिति तत्परीहाराय मन्त्रस्येन्द्रपदे विधिवाक्यस्थगार्हपत्यपदे वा एकत्र लक्षणावश्यकी। तत्र गार्हपत्यपदस्य इन्द्रे न लक्षणा गार्हपत्यदेवतात्वस्य लिङ्गानिरपेक्षश्रुतिप्राप्तत्वात् इन्द्रदेवतात्वन्तु लिङ्गेन विलम्बबोध्यम्। तथा हि इन्द्रप्रकाशनसामर्थ्यान्यथानुपपत्त्या इन्द्रमुपतिष्ठते इति कल्प्यते इति इन्द्रस्य देवतात्वं विलम्बगम्यमिति शीघ्रबोधकत्वेन श्रुतिरेव बलवतीति लिङ्गं दुर्बलम्। अतएव न समुच्चयः न वा इन्द्रस्यैवेति नियमः लिङ्गस्य दुर्बलत्वेन इन्द्रोपस्थानस्याप्राप्तत्वात्। एवञ्च श्रुतितोऽग्नेरुपस्थाने सिद्धे कथमित्याकाङ्क्षायामैन्द्र्येति। ततश्च मन्त्रस्येन्द्रप्रकाशकत्वात् तेनाग्नेरुपस्थानानुपपत्तेः न ह्यन्योपस्थापकमन्त्रेणान्यस्योपस्थानं युक्तमित्यनुपपत्त्या मन्त्रस्येन्द्रपदस्य इदि परमैश्वर्य्ये इति धात्वनुसारादैश्वर्य्यगुणयोगादग्नौ लक्षणा” “यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते। मन्त्रार्थं मन्त्रतो बुद्ध्वा पश्चाच्छक्तिर्निरूप्यते। मन्त्राकाङ्क्षावशेऽन्येन्द्रशेषत्वश्रुतिकल्पना। श्रुत्या प्रत्यक्षया पूर्वं गार्हपत्यार्थतां गते। लिङ्गस्य हि प्रमाणत्वं मन्त्राकाङ्क्षानिबन्धनम्। ताञ्च श्रुतिर्विरुध्यन्ती ह्यविरोधेन गच्छति। विरोधे च श्रुतिर्लिङ्गं बलीयस्त्वेन बाधते”। लियं लयं गच्छति सूक्ष्मो०। १०साङ्ख्योक्ते महत्तत्त्वे देहशब्दे ३७५४ पृ० दृश्यम्। ११सप्तदशावयवे लिङ्गदेहे।

“सप्तदशैकं लिङ्गम्” सा० सू० “सूक्ष्मशरीरमप्याधाराधेयभावेन द्विविधं भवति तत्र सप्तदश मिलित्वा लिङ्गशरीरं तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः। एकादशेन्द्रियाणि पञ्च तन्मात्राणि बुद्धिश्चेति सप्तदश। अहङ्कारस्य बुद्धावेवान्तर्भावः। चतुर्थसूत्रवक्ष्यमाणप्रमाणादेतान्येव सप्तदशलिङ्गं मन्तव्यम्। न तु सप्तदश एकं चेत्यष्टादशतया व्याख्येयम् उत्तरसूत्रेण व्यक्तिभेदस्योपपाद्यतयात्र लिङ्गैकत्वे एकशब्दस्य तात्पर्य्यावधारणाच्च। “कर्मात्मा पुरुषो योऽसौ बन्धमोक्षैः स युज्यते। ससप्तदशकेनापि राशिना युज्यते च सः” इति मोक्षधर्मादौ लिङ्गशरीरस्य सप्तदशत्वसिद्धेश्च सप्तदशावयवा अत्र सन्तीति सप्तदशको राशिरित्यर्थः। राशिशब्देन स्थूलदेहस्यावयवित्वं निराकृतम् अवयविरूपेण द्रव्यान्तरकल्पनायां गौरवात्। स्थूलदेहस्य चावयवित्वमेकतादिप्रत्ययानुरोधेन कल्प्यत इति। अत्र च लिङ्गदेहे बुद्धिरेव प्रधानेत्याशयेन लिङ्गदेहस्य भोगः प्रागुक्तः। प्राणस्यान्तःकरणस्यैव वृत्तिभेदः। अतो लिङ्गदेहे प्राणपञ्चकस्याप्यन्तर्भाव इत्यस्य सप्तदशावयवकस्य शरीरत्वं स्वयं वक्ष्यति “लिङ्गशरीरनिमित्तक इति सनन्दनाचार्य्यः” इति सूत्रेण। अतो भोगायतनत्वमेव मुख्यं शरीरलक्षणम्। तदाश्रयतया त्वन्यत्र शरीरत्वमिति पश्चाद्व्यक्तीभविष्यति। चेष्टेन्द्रियार्थाश्रयः शरीरमिति तु न्यायेऽपि तस्यैव लक्षणं कृतमिति” भा०। “तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः” सा० सू०। “तस्य लिङ्गस्य तदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिकदेहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहस्य वादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वमधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्य्यवसितोऽर्थः”। अधिष्ठानशरीरं च सूक्ष्मं पञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम्” “वासना भूतसूक्ष्मं च कर्मविद्ये तथैव च। दशेन्द्रियं मनोबुद्धिरेतल्लिङ्गं विदुर्बुधाः” इति वाशिष्ठादिवाक्येभ्यः। अत्र लिङ्गशरीरप्रतिपादनेनैव पुर्य्यष्टकमपि व्याख्येयमित्याशयेन बुद्धिधर्माणामपि वासनाकर्मविद्यानां पृथगुपन्यासः। भूतसूक्ष्मं चात्र तन्मात्रा, दशेन्द्रियाणि च ज्ञानकर्मेन्द्रियभेदेन पुरद्वयमित्याशयः। यत् तु मायावादिनो लिङ्गशरीरे तन्मात्रस्थाने प्राणादिपञ्चकं प्रक्षिपन्ति पुर्य्यष्टकं चान्यथा कल्पयन्ति तदप्रामाणिकमिति” भा०। वेदान्तिनये “पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्” इत्युक्तं सप्तदशावयवं लिङ्गशरीरमिति भेदः।

**लिङ्गक** पु० लिङ्गेन कायति कै—क। कपित्थवृक्षे शब्दच०।

**लिङ्गपुराण** पु० व्यासप्रणीते महापुराणभेदे लिङ्गपुराणप्रतिपाद्यविषया यथा “ब्रह्मोवाच “शृणु पुत्र! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम्। पठतां शृण्वताञ्चैव भुक्तिमुक्तिप्रदायकम्। यच्च लिङ्गाभिधे तिष्ठन् वह्निलिङ्गे हरोऽभ्यधात्। मह्यं धर्मादिसिद्ध्यर्थमग्निकल्पकथाश्रयम्। तदेव व्यासदेवेन भागद्वयसमाचितम्। पुराणं लिङ्गमुदितं बह्वाख्यानविचित्रितम्। तदेकादशसाहस्रं हरमाहात्म्यसूचकम्। परं सर्वपुराणानां सारभूतं जगत्त्रये। पुराणोपक्रमे प्रश्नः सृष्टिसंक्षेपतः पुरा”। तत्र पूर्वभागे “योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततः परम्। लिङ्गोद्भवस्तदर्चा च कीर्त्तिता हि ततःपरम्। सनत्कुमारशैलादिसंवादश्चाथ पावनः। ततो दधीचिचरितं युगधर्मनिरूपणम्। ततो भुवनकोशाख्या